# শ্রীকৃষ্ণস্তোত্রং ইন্দ্ররচিতম্

{॥ শ্রীকৃষ্ণস্তোত্রং ইন্দ্ররচিতম্ ॥}

শ্রী গণেশায নমঃ ।

ইন্দ্র উবাচ ।

অক্ষরং পরমং ব্রহ্ম জ্যোতীরূপং সনাতনম্ ।

গুণাতীতং নিরাকারং স্বেচ্ছামযমনন্তজম্ ॥ ১॥

ভক্তধ্যানায সেবাযৈ নানারূপধরং বরম্ ।

শুক্লরক্তপীতশ্যামং যুগানুক্রমণেন চ ॥ ২॥

শুক্লতেজঃস্বরূপং চ সত্যে সত্যস্বরূপিণম্ ।

ত্রেতাযাং কুঙ্কুমাকারং জ্বলন্তং ব্রহ্মতেজসা ॥ ৩॥

দ্বাপরে পীতবর্ণং চ শোভিতং পীতবাসসা ।

কৃষ্ণবর্ণং কলৌ কৃষ্ণং পরিপূর্ণতমং প্রভুম্ ॥ ৪॥

নবধারাধরোৎকৃষ্টশ্যামসুন্দরবিগ্রহম্ ।

নন্দৈকনন্দনং বন্দে যশোদানন্দনং প্রভুম্ ॥ ৫॥

গোপিকাচেতনহরং রাধাপ্রাণাধিকং পরম্ ।

বিনোদমুরলীশব্দং কুর্বন্তং কৌতুকেন চ ॥ ৬॥

রূপেণাপ্রতিমেনৈব রত্নভূষণভূষিতম্ ।

কন্দর্পকোটিসৌন্দর্যং বিভ্রতং শান্তমীশ্বরম্ ॥ ৭॥

ক্রীডন্তং রাধযা সার্ধং বৃন্দারণ্যে চ কুত্রচিত্ ।

কুত্রচিন্নির্জনেঽরণ্যে রাধাবক্ষঃস্থলস্থিতম্ ॥ ৮॥

জলক্রীডাং প্রকুর্বন্তং রাধযা সহ কুত্রচিত্ ।

রাধিকাকবরীভারং কুর্বন্তং কুত্রচিদ্বনে ॥ ৯॥

কুত্রচিদ্রাধিকাপাদে দত্তবন্তমলক্তকম্ ।

রাধার্চবিততাম্বূলং গৃহ্ণন্তং কুত্রচিন্মুদা ॥ ১০॥

পশ্যন্তং কুত্রচিদ্রাধাং পশ্যন্তীং বক্রচক্ষুষা ।

দত্তবন্তং চ রাধায়ৈ কৃত্বা মালাং চ কুত্রচিত্ ॥ ১১॥

কুত্রচিদ্রাধযা সার্ধং গচ্ছন্তং রাসমণ্ডলম্ ।

রাধাদত্তাং গলে মালাং ধৃতবন্তং চ কুত্রচিত্ ॥ ১২॥

সার্ধং গোপালিকাভিশ্চ বিহরন্তং চ কুত্রচিত্ ।

রাধাং গৃহীত্বা গচ্ছন্তং তাং বিহায চ কুত্রচিত্ ॥ ১৩॥

বিপ্রপত্নীদত্তমন্নং ভুক্তবন্তং চ কুত্রচিত্ ।

ভুক্তবন্তং তালফলং বালকৈঃ সহ কুত্রচিত্ ॥ ১৪॥

বস্ত্রং গোপালিকানাং চ হরন্তং কুত্রচিন্মুদা ।

গবাং গণং ব্যাহরন্তং কুত্রচিদ্বালকৈঃ সহ ॥ ১৫॥

কালীয়মূর্ধ্নি পাদাব্জং দত্তবন্তং চ কুত্রচিত্ ।

বিনোদমুরলীশব্দং কুর্বন্তং কুত্রচিন্মুদা ॥ ১৬॥

গায়ন্তং রম্যসঙ্গীতং কুত্রচিদ্বালকৈঃ সহ ।

স্তুত্বা শক্রঃ স্তবেন্দ্রেণ প্রণনাম হরিং ভিযা ॥ ১৭॥

পুরা দত্তেন গুরুণা রণে বৃত্রাসুরেণ চ ।

কৃষ্ণেন দত্তং কৃপযা ব্রহ্মণে চ তপস্যতে ॥ ১৮॥

একাদশাক্ষরো মন্ত্রঃ কবচং সর্বলক্ষণম্ ।

দত্তমেতৎকুমারায পুষ্করে ব্রহ্মণা পুরা ॥ ১৯॥

তেন চাঙ্গিরসে দত্তং গুরবেঽঙ্গিরসা মুনে ।

ইদমিন্দ্রকৃতং স্তোত্রং নিত্যং ভক্ত্যা চ যঃ পঠেত্ ॥ ২০॥

ইহ প্রাপ্য দৃঢাং ভক্তিমন্তে দাস্যং লভেদ্ধ্রুবম্ ।

জন্মমৃত্যুজরাব্যাধিশোকেভ্যো মুচ্যতে নরঃ ॥ ২১॥

ন হি পশ্যতি স্বপ্নেঽপি যমদূতং যমালযম্ ॥ ২২॥

॥ ইতি শ্রীব্রহ্মবৈবর্তে ইন্দ্রকৃতং শ্রীকৃষ্ণস্তোত্রং সমাপ্তম্ ॥

Proofread by Ravin Bhalekar ravibhalekar@hotmail.com

Please send corrections to sanskrit@cheerful.com

Last updated ত্oday

http://sanskritdocuments.org

Krishna Stotram ( By Indra ) Lyrics in Bengali PDF
% File name : indrakrishnastotra.itx
% Location : doc_vishhnu
% Author : Indra
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Transliterated by : WebD
% Proofread by : Ravin Bhalekar ravibhalekar at hotmail.com
% Description-comments : brahmavaivarta
% Latest update : January 19, 2005
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [ October 13, 2015 ] at Stotram Website